- Title – रावणवध सीताचरित्र
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 8 / पृ०16
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning – श्री गणेशाय नमः। श्री वाग्देव्यै नमः। नमामि परमां शक्तिमनंतां निष्कलामलाम्
- End – भूम्याकाशगते दाश्चंद्रे मार्गशीर्षे शिते गुनुः एकादश्यामिदं ग्रंथं वैजानाथेनालिखितम्।
- Colophon-
- Illustrations -
- Source -
- Subject - रामायण / रावणवधसीताचरित्रनाम
- Revisor -
- Author - वैजानाथेन
- Remarks- अपूर्ण

राहुल कुमार / Rahul kumar

श्रीगणेशायनमः श्रीवाग्देव्यैनमः नमामिपरमांशक्तिमनंतांनिष्कलामलाम् समीमा
हेश्वरीसीताशाश्वतीपरमात्मना १ नमोवाल्मीकिमुनयेभारद्वाजायवैनमः चरित्रमद्भुतं
वक्ष्येशृणुहेप्राणवल्लभे २ जानकीप्रकृतिस्सृष्टेरादिभूतामहागुणा तपस्सिद्धिः
स्वर्गसिद्धिर्विभूतिर्महतीमती ३ विद्याविद्याचमहतीगीयतेब्रह्मवादिभिः ऋद्धिस्सिद्धि
र्गुणमयीगुणातीतागुणात्मिका ४ ब्रह्मब्रह्मांडसंभूतासर्वकारणकारणा प्रकृतिर्विकृ
तिर्देवीचिन्मयीचिद्विनाशिनी ५ महाकुंडलसर्वमाश्रिताब्रह्मसंज्ञिता तस्याविलासि
तंसर्वंजगदेतच्चराचरम् ६ सामायायाहदिब्रह्मन्योगिनस्तत्वदर्शिनः विदंयांहस्यार्थं

थिर्भवति चलमूर्तिकाः ७ यदा यदा हि धर्मस्य ग्लानिर्भवति सुव्रते अभ्युत्थानमधर्म्म
स्य तदा प्रकृतिसंभवः ८ रामस्साक्षात्स्वयं ब्रह्म परमं परमः पुमान् आकृतौ परमो भे
देन सीतारामयोर्यतः ९ शक्तिशक्तिमतोर्भेदं वदंति फलहेतवे अभेदं चानुपश्यंति
योगिनस्तत्त्वदर्शिनः १० सीता प्रकृतिसंचिंत्या योगिभिश्चिंत्यते तदा महामाहेश्वरी
शक्तिर्महादेवी निरंजना ११ अपाणिपादः सर्वं गृहीता अचक्षुषः पश्यति सर्वविश्वं वि
कर्णो वा यश्च शृणोति वार्तामनासिको जिघ्रति सर्वगंधं १२ सर्वस्य विश्वस्य स एव वेत्ता
तमाहुरग्र्यं पुरुषं पुराणं तयोः परं जन्म उदाहरिष्ये द्वयोर्यथाकारणदेहधारिणो १३

प्राप्ता राज्यस्य रामस्य राक्षसानां वधे कृते आजग्मुर्मुनयस्सर्वे राघवं प्रतिनंदितुम् १४
आगत्य प्रमुखा विप्रा दिष्ट्या दिष्ट्येति चाब्रुवन् राघवं प्रशशंसुस्ते मुनयो वाग्विदां वराः
१५ तस्य वाचं समाश्रुत्य जानकी इदमब्रवीत् मुनिभिश्च यदुक्तं हि रावणस्य वधं प्रति
१६ परिहासमिवाभाति प्रशंसनमिदं द्विजः दशास्यस्य वधो विप्राः न प्रशंसमिहार्हति
१७ एतच्छ्रुत्वा तु मुनयो विस्मयं परमं गताः तद्दृष्ट्वा जानकी देवी वदतां मधुभाषिणी १८
अत्रा पितृगृहे स्माभिः रावणस्याद्भुतं कथा यथा मुनिप्रवीणेन तथा वक्ष्यामि श्रूयतां
१९ दधिमंडोदकाद्वोः परस्तादुदकोष्णिकः पुष्करद्वीपविख्यातः सर्वशोभासमायुतः

सुमाली राक्षसश्रेष्ठः कैकसी नाम तत्सुता मुनेर्विश्रवसः पत्नी मासूत रावणाद्वयम् २१
एकस्सहस्रवदनो द्वितीयो दशवक्त्रकः कनिष्ठो दशकण्ठश्च शितिकण्ठप्रसादितः
लंकामधिवसत्येष धनदेन विनिर्मिताम् ब्रह्मणो वरदानेन त्रिलोकीमप्यमन्यत २३
ज्येष्ठस्सहस्रवदनो रावणो लोकरावणः स्वाभाविकबलेनासौ पुष्करद्वीपमाश्रितः २
४ विनापि तपसा वीरो विना मंत्रौषधेन च जगदुन्मूलने शक्तस्स्वबाहुबलमाश्रितः २५
मानसोत्तरशैलस्य चतुर्दिक्षु पुराणि च आधिपत्यं गृहीतानि द्विपीशानां महात्मना २६
तत्रैव रमते राजा मातामहकुलैस्सह आस्ते जगद्वशीकृत्य हेलया बाहुलीलया २७

इंद्रादींस्त्रिदशान्सर्वान्कालेबध्वा सकिन्नरान् एवं स रावणो विप्रास्सहस्रवदनो महान् २
८ एतादृशो बाहुवीर्याद्दशास्यो रावणो हतः इदं लोकानां कर्म कृतं लोकहितं महत्
२९ तथापि हृदये न द्विजा आश्चर्यं प्रतिभाति मे यदि तस्य वधः कार्यो ज्ञातव्यस्य दुरात्मनः ३०
तदा सम्भाव्यते कीर्तिर्जगत्यास्य मनानृपात् रावणो वचनं श्रुत्वा सीताया वीर्यवर्धनम्
३१ सिंहनादं विनद्योच्चैस्सर्वानाज्ञापयत्प्रभुः गच्छध्वं सहितास्तत्र सैनिकैस्सह मंत्रिभिः ३
२ इत्याज्ञाप्य द्रागाहवसंभारमुपाकरोद्रथं तमभ्ययुर्महावीर्या रामचन्द्रपुरोगमाः ३३
भरतो लक्ष्मणश्चैव शत्रुघ्नश्च महाद्युतिः सुग्रीवप्रमुखास्सर्वे वानराश्च जितारयः ३४

विभीषणोमहाबाहुस्सहरक्षोगणैःप्रभु सीताचरामकार्यार्थेनिर्ययौराघवाज्ञया ३५ सुग्रीवा
द्यामंत्रिणश्चऋक्षयक्षापिनिर्ययुः नानाशस्त्रप्रहरणास्तथायुधकलापिनः ३६ धनुःशब्दे
नामहतासिंहनादेनचैवहि चचालवसुधाचेलुःशैलापेतुर्महाद्रुमात् ३७ नद्यश्चक्षुभिताश्च
द्राश्चसमुद्राश्चचकंपिरे विभीषणश्चसुग्रीवोजांबवान्नलएवच ३८ प्रसंतइवतेसर्वेनिर्ययु
रामशासनात् रामाज्ञयापुष्पकश्चतदाकाशपथाश्रितः ३९ जगामपुष्करंद्वीपंयत्रास्तेमा
नसोत्तरे राघवोभ्रातृभिस्सार्द्धंसहवानरपुंगवैः ४० सिंहनादंविनद्योच्चैर्धनुश्चापिविकर्षय
न् सप्राद्रवत्समुत्ताभूत्वापृथिवींचांतरिक्षकं ४१ रावणस्सहसोतस्थौकिमेतदितिसंवदन् ।

इत्युमाभाष्यसहसाराक्षसेंद्रोमहाबलः ४१ नगरान्निर्ययौशीघ्रंसंदष्टौष्ठपुटोबली द्वादशा
दित्यसंकाशःसहस्रवदनोमहान् ४२ नानायुधसहस्राणिविविधानिधनूंषिच प्रगृह्यसह
साप्रायाद्राममेंहंतुमुपाद्रवत् ४३ कोयमित्यब्रवीद्रोषाद्दन्तिनंप्रहसन्निव सिंहनादंप्रकुर्वाण
श्रुत्वात्रोभवतिमेपुरः ४४ मयापिचप्रतिज्ञातंदर्पशमनमुपागमत् ग्रंथैवंक्रुधागर्जन्नाज
गामांतिकंप्रभोः ४५ सेनाध्यक्षाराक्षसेंद्राराजानामाज्ञंसमागताः नानाप्रहरणोपेतानानार
थसमाकुलाः ४६ रावणस्यौरसाःपुत्रामहाराक्षसपुंगवाः नानाशस्त्रधराबीराहंतुंवैराघवंर
णे ४७ वाद्यशब्दैःसिंहनादैःपूरयन्तोदिशोदश रणेसैन्यसहस्राणिसहस्राण्यर्बुदानिच

नानाशस्त्रधरा घोररूपा विविधायुधपाणयः नानावस्त्रधराश्चैव चर्मवासस एव च ४९
महाबला महावेगाश्चासंख्याता दिविशेषतः राक्षसाश्चापि घोरास्ते वानरान्भक्षमानयन् ५
० रावणस्यानुगान्वीरांश्च रहस्यांश्च पत्तीन: मुहूर्त्तमात्राद्भूमिरभवच्छोणिताहता ५१
वानरान्वानरैरेव गजैर्घोराहिरासमाम् रथेन रथिनश्चापि राक्षसान्राक्षसेन च ५२ ह
अनेन हयं केचित्तिपिशुर्धरणीतले मनसा चिन्तयामास सहस्रवदनो महान् ५३
येते क्षुद्रा महाधूर्ता नरा वानरराक्षसाः यस्मिन्देशात्समायातास्तं देशं प्रापयाम्यहे ५४
इति संचिन्त्य धनुषि वायव्यास्त्रं व्ययोजयत् तेनास्त्रेण नरा गृध्रा वानरा राक्षसास्तथा ५५

यस्माद्यस्मात्समायातास्तं तं देशमवापिता स्वगृहे प्राप्य ते सर्वे शोचंतो राममेव च ५६
पुष्पके पुष्करे तिष्ठन्नमीतो राघवः परम् एतद्दृष्ट्वा महाबाहुरामश्शत्रुनिबर्हणः ५७
विविकर्ष धनुःश्रेष्ठं प्रलयानलसन्निभम् जघान राक्षसान्रामो रुद्रः पशुगणानिव ५८
तद्दृष्ट्वाद्भुतं कर्म कृतं तेनासि तारावणः अनीकाग्रं समासाद्य युयुधे राघवेण हि ५९
तदभूदद्भुतं युद्धं द्वैरथं लोमहर्षणम् रामस्य च महाबाहोर्बलिनो रावणस्य च ६०
सहस्रवदनः क्रुद्धः क्षुरप्रं गृह्य सायकम् वक्षो निर्भिद्य सहसा रामस्य सुमहात्मनः ६१
ततो रामो महाबाहुः पपात पुष्पकोपरि निःसंज्ञो निश्चलश्चासीद्धाहाकृतानि चाक्रिरे

ऋषयः किन्नराः सिद्धा हाहा रामेति वादिनः रोदयन विविधालापदेवाश्चाकाशसंस्थिताः ६३ २

तिष्ठन्तु ते रामरावणयुद्धपूर्ववेडः तदा तु मुनयो दृष्ट्वा सीतां प्राहुः सितानना वशिष्टप्रमुखाः सर्वे प्रो

चुः सीतां महर्षयः ६४ श्रुत्वेति द्वचनं तेषां मुनीनां भाविनात्मनां रामं तथा विधं दृष्ट्वा शयानं पुष्प

कोपरि ६५ नर्दंत राक्षसं चापि महाबलपराक्रमं अट्टहासं विनद्योच्चैः सीता जनकनंदिनी

६६ स्वरूपं विजहौ देवी महाविकटरूपिणी दीर्घजंघा महारावा मुंडमालाविभूषणा ६७ ।

अस्थिं च किंकिणीजालाभीमवेगपराक्रमा खरस्वरमहाघोरा विकृता विकृतानना ६८ चतु

र्भुजा दीर्घतुंडा सर्वालंकारणोज्वला ललज्जिह्वा जटाजूटमंडिता चंडरोमिका ६९ प्रलयांभोद

कालाभा घंटा घोषविधायिनी अवमत्कंधरस्यान्तरौ खड्गखप्परधारिणी ७० पुपिनीव वर्णिका

यूथे पपात निमिषांतरे शिवा शिवा च तस्याशु निमेषांतरमात्रतः ७१ खड्गेन तस्य चिच्छेद सह

स्राणि लीलया अन्येषां योधवीराणां शिरांसि निखरेहणा ७२ छिन्नानि पातयामास

भूमौ तेषां दुरात्मनां केषांचित्पाटयामास नखैः कोष्ठानि जानकी खड्गेन चाधिनत्कांश्चिद्वा

हूनन्याश्च चिच्छिदे ७३ खंडखंडं चकारान्यान् तिलशः कांश्चिदेव हि अस्त्रानन्याश्च चाक

र्पपादाघातेन कांश्चन परश्चैन जघानान्यानन्यास्तिनान्यानपोथयत् कांश्चिद्धीरभ्रमतेन इस्याप्य

न्यानपातयत् प्रलयंकरवेतीसीता राक्षसानां भयंकरी निजघानाट्टहासेन कांश्चित्दृष्टे द्विधाकरोत् ।

श्री

६

काश्चित्केशसमाकृष्यनिःपिपेषमहीतले सरथान्सगजान्श्वांश्चक्रपादान्महतोसुरान ६

७ काश्चिद्घोरान्समाकृष्यभक्षयामासवारिधौ गलेचोद्धृत्यकेषांचित्प्राणांजग्राहजानकी

७८ केषांचित्स्कंधमारुह्यशिरांस्युत्पाटितानिवै हुंकारेणाट्टहासेनकेषांप्राणानपाहरत ।

७९ काश्चित्प्रकोपवदनापशुमारममारयत् तान्सर्वान्निमिषेणैवनिहत्यजनकात्मजा ।

८० तेषामेउभिःशिरसांमालाकृतविभूषणा सर्वासांशिरांस्युग्रांनादायरणमूर्द्धनि ८१

कंदुकक्रीडनंचक्रेमनस्वीमनस्विनी एतस्मिन्नंतरेतस्यारोमकूपेभ्यउत्थिता ८२

मातरोविकृताराया:साट्टहासा:समाययु: सहकंदुकलीलार्थंसीतायाश्चसहस्रश:

८३ याभिर्व्याप्तास्त्रयोलोका:कल्पाग्नीभिश्चराचरा: शिरांसिराक्षसांगृह्यगंडशैलोपमानिवै

:८४ चिक्रीडु:सीतयासार्द्धंवर्तमानारणाजिरे ननर्दजानकीदेवीघोराकालीमहाबला

८५ तदाचकंपेपृथिवीनौरिवानलवेपिता अट्टहासेनसीतायांमाखणांकृतेनवै ८६

प्रलयंमेनिरेलोकाःकिमेतदितिविस्मिताः वसुंधरायाःपातालंगमंताकर्षसोत्तमैः ८७

शवमावम्हादेवोसीतापादतलेस्थिताः सकोपंचैवसीतायांवीक्ष्यब्रह्मपुरोगमाः ८८

सलोकपालास्त्रिदशाःऋषिभिर्पितृभिस्सह कृतांजलिपुटादेवाःप्रणम्याहुःपुनःपुनः

८९ ब्रह्मयास्तोतुमारब्धाःसीताराक्षसनाशिनीं यासामाहेश्वरीशक्तिःशानरूपानिरामया

अनन्तानिष्कलानित्यास्थितारामवल्लभा एकाकीसाविलसतीशक्तिरेकोपाधियोगतः ९१

परापरामहारूपाजानकीकौतुमसन्निधौ चतस्रश्शक्तयोदेवास्स्वरूपेणसंस्थिताः ९२

अधिष्ठानंचतासांसाजानकीरामयोषिता विश्वपालनकर्त्रीचनिहन्त्रीविश्वसंश्रया ९३

एवंतांनगरांहत्वानगतांसुखमाहिते किंपुनर्देवकल्पयाजगतांहीयतेत्वया ९४

एतच्छ्रुत्वाविशालाक्षीवंदिताब्रह्मणादयः पतिर्भिविह्वलहृदयःशीतेशूलकरावसः ९५

ध्यात्वेमकंकालिध्यामिजगदेतच्चराचरम् श्रुत्वातद्वचनंब्रह्मसनगत्वापुष्पकसन्निधौ ९६

बोधयामासवैरामंसम्प्राप्तस्वमुपाणिना नापश्यन्राघवस्सीतांपश्यन्कालींवरूपतां ९७

पपातहस्ताद्रामस्यवेगात्कुसुमसारंधनुः पुनःब्रह्ममुखाद्रामोश्रुत्वारावणघातनम् ९८

पराक्रमंचसीतायास्समुत्थायमहाभुजः प्रणम्यशिरसाभूमौकृतांजलिपुटोभवत् ९९

उवाचपरमेशानीकृपयाराघवंप्रति अहंसर्वात्मनात्माचसर्वान्तरशिवातथा १००

शाश्वतीसर्वविज्ञानासर्वमूर्तिप्रवर्तिका दिव्यंददामितिचक्षुपश्यमेयोगमैश्वरम् १०१

इत्युक्त्वाविररामैषारामोपश्यच्चतत्पदम् कोटिसूर्यप्रतीकाशंकालानलशतोपमम् २

दंष्ट्राकरालवदनंत्रिशूलवरधारिणम् किरीटिनींगदाहस्तांशंखचक्रधराम्भवाम् ३

ईदृशाचताद्दृशींरूपंरामस्संत्रस्तमानसः स्तुत्वानामसहस्रेणकालिकांपरमेश्वरीं ४

श्री ८

भूयःप्रणम्यसीतान्साप्रोवाचेदंकृताञ्जलिः यदेतद्देव्वरंरूपंघोरन्तत्परमेश्वरि ५
भीतोस्मिप्रणतंदृष्ट्वारूपमन्यन्मदर्शय एवमुक्ताथसादेवीतेनरामेणमैथिली ६
संहृत्यदर्शयामासस्वरूपमारमसुनः तादृशीमसमालोक्यभीतिंसन्त्यज्यराघवः ७
स्वभावेनानेनमनोषावैदेहीरघुनन्दनः तस्मात्प्रार्थयतस्सद्यः अयोध्यामागतःपुरा
१०८ इतिश्रीसंक्षेपाद्भुतरामायणेरावणवधंसीताचरित्रन्नामउत्तरखण्डः ०
संम्पाकाशग्रहाश्वेन्दुमार्गशीर्षेसितेगुरौः एकादश्यामिदंग्रन्थंवैज्यनाथेन(
लेखितम॥